१. **सुविभक्तौ** - लिह् + सु > अनुबन्धकार्ये > लिह् + स् > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप त्तं हल् ()' इति सलोपे > लिह् > 'हो ढः' इति पदान्तस्य हकारस्य स्थाने ढकारे > लिढ् > वावसाने इति चर्त्वे > लिट्। पक्षे 'झलां जशो न्ते' इति जश्त्वे > लिड्।

२. **अजादिविभक्तौ** - लिह् + औ = लिहौ। एवमेव सर्वेषु त्रयोदशसु अजादिषु प्रत्ययेषु ज्ञेयम्।

३. **भकारादिविभक्तौ** - लिह् + भ्याम् > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'हो ढः' इति पदान्तस्य हकारस्य स्थाने ढकारे > लिढ् + भ्याम् > 'झलां जशो न्ते' इति जश्त्वे > लिड्भ्याम्। एवमेव - लिड्भिः। लिड्भ्याम्। लिड्भ्यः। लिड्भ्याम्। लिड्भ्यः।

सुप्विभक्तौ -

लिह् + सुप् > अनुबन्धकार्ये > लिह् + सु > 'हो ढः' इति पदान्तस्य हकारस्य स्थाने ढकारे > लिढ् + सु > खरि च इति चर्त्वे > लिट् + सु > लिट्सु। अत्र 'ष्टुना ष्टु' इति प्राप्तं ष्टुत्वं 'न पदान्ताट्टोरनाम् इति निषिध्यते।

प्रथमा	-	लिट्/लिड्	लिहौ	लिहः
द्वितीया	-	लिहम्	लिहौ	लिहः
त तीया	-	लिहा	लिड्भ्याम्	लिड्भिः
चतुर्थी	-	लिहे	लिड्भ्याम्	लिड्भ्यः
प चमी	-	लिहः	लिड्भ्याम्	लिड्भ्यः
षष्ठी	-	लिहः	लिहोः	लिहाम्
सप्तमी	-	लिहि	लिहोः	लिट्सु
सम्बोधनम्	-	हे लिट्/लिड्	लिहौ	लिहः

◆◆◆◆◆◆◆

© jkf"V;laLd`rlaLFkku] ubZnsgyh] 2012

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

भकारादिविभक्तौ ढकारपक्षे - द्रुह् + भ्याम् > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'वा द्रुहमुहष्णुहष्णिहाम्' इति पदान्तस्य हकारस्य स्थाने ढकारपक्षे > द्रुढ् + भ्याम् > 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इत्यनेन दकारस्य भष्भावे > ध्रुढ् + भ्याम् > 'झलां जशो न्ते' इति जश्त्वे > ध्रुड्भ्याम्। एवमेव - ध्रुड्भिः। ध्रुड्भ्याम्। ध्रुड्भ्यः। ध्रुड्भ्याम्। ध्रुड्भ्यः।

४. सुप्विभक्तौ घकारपक्षे -

द्रुह् + सुप् > अनुबन्धकार्ये > द्रुह् + सु > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'वा द्रुहमुहष्णुहष्णिहाम्' इति पदान्तस्य हकारस्य स्थाने घकारपक्षे > द्रुघ् + सु > 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इत्यनेन दकारस्य भष्भावे > ध्रुघ् + सु > खरि च इति चर्त्वे > ध्रुक् + सु > 'आदेशप्रत्यययोः ()' इति प्रत्ययसकारस्य मूर्धन्यादेशे > ध्रुक्षु।

सुप्विभक्तौ ढकारपक्षे -

द्रुह् + सुप् > अनुबन्धकार्ये > द्रुह् + सु > 'वा द्रुहमुहष्णुहष्णिहाम्' इति पदान्तस्य हकारस्य स्थाने ढकारपक्षे > द्रुढ् + सु > 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इत्यनेन दकारस्य भष्भावे > ध्रुढ् + सु > खरि च इति चर्त्वे > ध्रुट् + सु > ध्रुट्सु। अत्र 'ष्टुना ष्टु' इति प्राप्तं ष्टुत्वं 'न पदान्ताट्टोरनाम् इति निषिध्यते।

प्रथमा	-	ध्रुक्/ध्रुग् ध्रुट्/ध्रुड्	द्रुहौ	द्रुहः
द्वितीया	-	द्रुहम्	द्रुहौ	द्रुहः
त तीया	-	द्रुहा	ध्रुग्भ्याम् ध्रुड्भ्याम्	ध्रुग्भिः ध्रुड्भिः
चतुर्थी	-	द्रुहे	ध्रुग्भ्याम् ध्रुड्भ्याम्	ध्रुग्भ्यः ध्रुड्भ्यः
प चमी	-	द्रुहः	ध्रुग्भ्याम् ध्रुड्भ्याम्	ध्रुग्भ्यः ध्रुड्भ्यः
षष्ठी	-	द्रुहः	द्रुहोः	द्रुहाम्
सप्तमी	-	द्रुहि	द्रुहोः	ध्रुक्षु ध्रुट्सु
सम्बोधनम्	-	हे ध्रुक/ध्रुग्	हे द्रुहौ	हे द्रुहः

एवम् -

मुह्	-	मुक्/मुग्/मुट्/मुड्	मुहौ	मुहः।
स्नुह	-	स्नुक्/स्नुग्/स्नुट्/स्नुड्	स्नुहौ	स्नुहः।
स्निह्	-	स्निक्/स्निग्/स्निट्/स्निड्	स्निहौ	स्निहः।

वाह्-अनडुह्-इत्येतौ शब्दौ वर्जयित्वा शेषहकारान्तशब्दाः
स्त्रीलिङ्गे, पुंल्लिङ्गे च, यथा - लिह्, मिह्, रुह्, वह्, इत्यादयः

हो ढः - (८.२.३३) - शेषहकारान्तानां धातूनां यः हकारः, तस्य स्थाने ढकार आदेशो भवति, झलि परतः, पदान्ते च।

TRIAL MODE - a valid license will remove this message. See the keywords property of this PDF for more information.

२. दह् + औ = दहौ। एवमेव सर्वेषु त्रयोदशसु अजादिषु प्रत्ययेषु ज्ञेयम्।

३. दह् + भ्या् > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'दादेर्धातोर्घः' इति पदान्तस्य हकारस्य स्थाने घकारे > दघ् + भ्याम् > 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इत्यनेन हकारस्य भष्भावे > धघ् + भ्याम् > 'झलां जशो न्ते' इति जश्त्वे > धग्भ्याम्। एवमेव - धग्भिः। धग्भ्याम्। धग्भ्यः। धग्भ्याम्। धग्भ्यः।

४. दह् + सुप् > अनुबन्धकार्ये > दह् + सु > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'दादेर्धातोर्घः' इति पदान्तस्य हकारस्य स्थाने घकारे > दघ् + सु > 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इत्यनेन दकारस्य भष्भावे > धघ् + सु > खरि च इति चर्त्वे > धक् + सु > धक्षु।

प्रथमा	-	धक्/धग्	दहौ	दहः
द्वितीया	-	दहम्	दहौ	दहः
त तीया	-	दहा	धग्भ्याम्	धग्भिः
चतुर्थी	-	दहे	धग्भ्याम्	धग्भ्यः
प चमी	-	दहः	धग्भ्याम्	धग्भ्यः
षष्ठी	-	दहः	दहोः	दहाम्
सप्तमी	-	दहि	दहोः	धक्षु
सम्बोधनम्	-	हे धक/धग्	हे दहौ	हे दहः

एवमेव - दिह् - धिक्/धिग् दिहौ दिहः। **दुह्** - धुक्/धुग् दुहौ दुहः।

हकारान्ताः 'द्रुह्' 'मुह्' 'स्नुह्' 'स्निह्' शब्दाः, स्त्रीलिङ्गे, पुंल्लिङ्गे च

वा द्रुहमुहष्णुहष्णिहाम् - (८.२.३३) - द्रुह्, मुह्, ष्णुह्, ष्णिह्, इत्येतेषां हकारान्तानां धातूनां यो हकारः, तस्य स्थाने विकल्पेन ढकारघकारौ भवतः, झलि परतः, पदान्ते च।

१. सुविभक्तौ घकारपक्षे -

द्रुह् + सु > अनुबन्धकार्ये द्रुह् + स् > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप त्तं हल् ()' इति सलोपे > द्रुह् > 'वा द्रुहमुहष्णुहष्णिहाम्' इति पदान्तस्य हकारस्य स्थाने घकारपक्षे > द्रुघ् > 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इत्यनेन दकारस्य भष्भावे > ध्रुघ् > वावसाने इति चर्त्वे > ध्रुक्। पक्षे 'झलां जशो न्ते' इति जश्त्वे > ध्रुग्।

सुविभक्तौ ढकारपक्षे - द्रुह् + सु > अनुबन्धकार्ये > द्रुह् + स् > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप त्तं हल् ()' इति सलोपे > द्रुह् > 'वा द्रुहमुहष्णुहष्णिहाम्' इति पदान्तस्य हकारस्य स्थाने ढकारपक्षे > द्रुढ् > 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इत्यनेन दकारस्य भष्भावे > ध्रुढ् > वावसाने इति चर्त्वे > ध्रुट्। पक्षे 'झलां जशो न्ते' इति जश्त्वे > ध्रुड्।

२. अजादिविभक्तौ - द्रुह् + औ = द्रुहौ। एवमेव सर्वेषु त्रयोदशसु अजादिषु प्रत्ययेषु ज्ञेयम्।

३. भकारादिविभक्तौ घकारपक्षे -

द्रुह् + भ्याम् > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'वा द्रुहमुहष्णुहष्णिहाम्' इति पदान्तस्य हकारस्य स्थाने घकारपक्षे > द्रुघ् + भ्याम् > 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इत्यनेन दकारस्य भष्भावे > ध्रुघ् + भ्याम् > 'झलां जशो न्ते' इति जश्त्वे > ध्रुग्भ्याम्। एवमेव - ध्रुग्भिः। ध्रुग्भ्याम्। ध्रुग्भ्यः। ध्रुग्भ्याम्। ध्रुग्भ्यः।

© jkf"V;laLd`rlaLFkku] tks/kiqj] 2012

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

प्रथमा	-	मुट्/मुड्	मुषौ	मुषः
द्वितीया	-	मुषम्	मुषौ	मुषः
त तीया	-	मुषा	मुड्भ्याम्	मुड्भिः
चतुर्थी	-	मुषे	मुड्भ्याम्	मुड्भ्यः
प चमी	-	मुषः	मुड्भ्याम्	मुड्भ्यः
षष्ठी	-	मुषः	मुषोः	मुषाम्
सप्तमी	-	मुषि	मुषोः	मुक्षु
सम्बोधनम्	-	हे मुट्/मुड्	हे क्रुशौ	हे क्रुशः

हकारान्तः 'नह्' शब्दः, स्त्रीलिङ्गे, पुंल्लिङ्गे च

नहो धः - (८.२.३४) - नह्धातोः यः हकारः, तस्य स्थाने धकार आदेशो भवति, झलि परतः, पदान्ते च।

१. नह् + सु > अनुबन्धकार्ये > नह् + स् > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप तं हल् ()' इति सलोपे > नह् > 'नहो धः' इति पदान्तस्य हकारस्य स्थाने धकारे > नध् > वावसाने इति चर्त्वे > नत्। पक्षे 'झलां जशो न्ते' इति जश्त्वे > नद्।

२. नह् + औ = नहौ। एवमेव सर्वेषु त्रयोदशसु अजादिषु प्रत्ययेषु ज्ञेयम्।

३. नह् + भ्याम् > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'नहो धः' इति धकारे > नध् + भ्याम् > 'झलां जशो न्ते' इति पदान्तस्य धकारस्य जश्त्वे > नद्भ्याम्। एवमेव - नद्भिः। नद्भ्याम्। नद्भ्यः। नद्भ्याम्। नद्भ्यः।

४. नह् + सुप् > अनुबन्धकार्ये > नह् + सु > 'नहो धः' इति पदान्तस्य हकारस्य स्थाने धकारे > नध् + सु > खरि च इति चर्त्वे > नत् + सु = नत्सु।

प्रथमा	-	नत्/नद्	नहौ	नहः
द्वितीया	-	नहम्	नहौ	नहः
त तीया	-	नहा	नद्भ्याम्	नद्भिः
चतुर्थी	-	नहे	नद्भ्याम्	नद्भ्यः
प चमी	-	नहः	नद्भ्याम्	नद्भ्यः
षष्ठी	-	नहः	नहोः	नहाम्
सप्तमी	-	नहि	नहोः	नत्सु
सम्बोधनम्	-	हे नत्/नद्	हे नहौ	हे नहः

दकारादि हकारान्ताः 'दह्' दिह्' 'दुह्' शब्दाः, स्त्रीलिङ्गे, पुंल्लिङ्गे च

दादेर्धातोर्घः - (८.२.३२) - दकारादिहकारान्तो यो धातुः, तस्य यो हकारः, तस्य स्थाने घकार आदेशो भवति, झलि परतः, पदान्ते च।

१. दह् + सु > अनुबन्धकार्ये दह् + स् > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप तं हल् ()' इति सलोपे > दह् 'दादेर्धातोर्घः' इति पदान्तस्य हकारस्य घकारे > दघ् > 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इत्यनेन दकारस्य भष्भावे > धघ् > वावसाने इति चर्त्वे > धक्। पक्षे 'झलां जशो न्ते' इति जश्त्वे > धग्।

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

त तीया	-	फला	फल्भ्याम्	फल्भि:
चतुर्थी	-	फले	फल्भ्याम्	फल्भ्य:
प चमी	-	फल:	फल्भ्याम्	फल्भ्य:
षष्ठी	-	फल:	फलो:	फलाम्
सप्तमी	-	फलि	फलो:	फल्षु
सम्बोधनम्-		हे फल्	हे फलौ	हे फल:

सर्वेषां शकारान्तानां शब्दानां रूपाणि 'क्रुश्' शब्दवद् भवन्ति

स्त्रीलिङ्गे, पुंल्लिङ्गे च

१. क्रुश् + सु > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप क्तं हल् ()' इति सलोपे क्रुश् 'व्रश्चभ्रस्जस जम जयजराजभ्राजच्छशां ष:' इति शकारस्य षकारे > वावसाने इति चर्त्वे > क्रुट्, पक्षे 'झलां जशो न्ते' इति जश्त्वे > क्रुड्।

२. क्रुश् + औ = क्रुशौ। एवमेव त्रयोदशसु अजादिषु प्रत्ययेषु।

३. क्रुश् + भ्याम् > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'व्रश्चभ्रस्जस जम जयज-राजभ्राजच्छशां ष:' इति शकारस्य षकारे > क्रुष् + भ्याम् 'झलां जशो न्ते' इति जश्त्वे > क्रुड् + भ्याम् > क्रुड्भ्याम्। एवमेव - क्रुड्भि:। क्रुड्भ्याम्। क्रुड्भ्य:। क्रुड्भ्याम्। क्रुड्भ्य:।

४. क्रुश् + सुप् > 'व्रश्चभ्रस्जस जम जयजराजभ्राजच्छशां ष:' इति शकारस्य षकारे > क्रुष् + सु > 'झलां जशो न्ते' इति जश्त्वे > क्रुड् + सु > 'खरि च' इति चर्त्वे > क्रुट्सु। अत्र 'न पदान्ताट्टोरनाम् इति ष्टुत्वं न भवति।

प्रथमा	-	क्रुट्/क्रुड्	क्रुशौ	क्रुश:
द्वितीया	-	क्रुशम्	क्रुशौ	क्रुश:
त तीया	-	क्रुशा	क्रुड्भ्याम्	क्रुड्भि:
चतुर्थी	-	क्रुशे	क्रुड्भ्याम्	क्रुड्भ्य:
प चमी	-	क्रुश:	क्रुड्भ्याम्	क्रुड्भ्य:
षष्ठी	-	क्रुश:	क्रुशो:	क्रुशाम्
सप्तमी	-	क्रुशि	क्रुशो:	क्रुक्षु
सम्बोधनम्-		हे क्रुट्/क्रुड्	हे क्रुशौ	हे क्रुश:

सजुष्, षष् इति शब्दद्वयं वर्जयित्वा सर्वेषां षकारान्तानां शब्दानां रूपाणि 'मुष्' शब्दवद् भवन्ति

स्त्रीलिङ्गे, पुंल्लिङ्गे च

१. मुष् + सु > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप क्तं हल् ()' इति सलोपे > मुष् > वावसाने इति चर्त्वे > मुट्, पक्षे 'झलां जशो न्ते' इति जश्त्वे > मुड्।

२. मुष् + औ = मुषौ। एवमेव त्रयोदशसु अजादिषु प्रत्ययेषु।

३. मुष् + भ्याम > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'झलां जशो न्ते' इति जश्त्वे > मुड् + भ्याम् > मुड्भ्याम्। एवमेव - मुड्भि:। मुड्भ्याम्। मुड्भ्य:। मुड्भ्याम्। मुड्भ्य:।

४. मुष् + सुप > 'झलां जशो न्ते' इति जश्त्वे > मुड् + सु > 'खरि च' इति चर्त्वे > मुट्सु। अत्र 'न पदान्ताट्टोरनाम् इति ष्टुत्वं न भवति।

© jkf"V;laLd`rlaLFkku] ykslgyh] 2012

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

भकारान्तः 'लभ्' शब्दः, स्त्रीलिङ्गे, पुंल्लिङ्गे च

प्रथमा	-	प्रशान्	प्रशामौ	प्रशामः
द्वितीया	-	प्रशामम्	प्रशामौ	प्रशामः
त तीया	-	प्रशामा	प्रशान्भ्याम्	प्रशान्भिः
चतुर्थी	-	प्रशामे	प्रशान्भ्याम्	प्रशान्भ्यः
प चमी	-	प्रशामः	प्रशान्भ्याम्	प्रशान्भ्यः
षष्ठी	-	प्रशामः	प्रशामोः	प्रशामाम्
सप्तमी	-	प्रशामि	प्रशामोः	प्रशान्सु
सम्बोधनम्	-	हे प्रशान्	हे प्रशामौ	हे प्रशामः

चतुर्शब्दं वर्जयित्वा सर्वेषां रेफान्तानां शब्दानां रूपाणि 'जिर्' शब्दवद् भवन्ति, स्त्रीलिङ्गे, पुंल्लिङ्गे च

१. जिर् + सु > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप क्तं हल् ()' इति सलोपे > जिर् 'सुप्तिङन्तं पदम्' इति पदसंज्ञायां 'र्वोरुपधाया दीर्घः' इत्युपधादीर्घे > जीर् > 'खरवसानयोर्विसर्जनीयः' इति पदान्तस्य रेफस्य विसर्गे - जीः।

२. जिर् + औ = जिरौ। एवमेव त्रयोदशसु अजादिषु प्रत्ययेषु।

३. जिर् + भ्याम् > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'र्वोरुपधाया दीर्घः' इत्युपधादीर्घे > जीर् + भ्याम् = जीर्भ्याम्। एवमेव - जीर्भिः, जीर्भ्यः।

४. जिर् + सुप् > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'र्वोरुपधाया दीर्घः' इत्युपधादीर्घे > जीर् + सु > 'आदेशप्रत्यययोः' इति प्रत्ययसकारस्य मूर्धन्यादेशे > जीर्षु।

प्रथमा	-	जीः	जिरौ	जिरः
द्वितीया	-	जिरम्	जिरौ	जिरः
त तीया	-	जिरा	जीर्भ्याम्	जीर्भिः
चतुर्थी	-	जिरे	जीर्भ्याम्	जीर्भ्यः
प चमी	-	जिरः	जीर्भ्याम्	जीर्भ्यः
षष्ठी	-	जिरः	जिरोः	जिराम्
सप्तमी	-	जिरि	जिरोः	जीर्षु
सम्बोधनम्	-	हे जीः	जिरौ	हे जिरः

सर्वेषां लकारान्तानां शब्दानां रूपाणि 'फल्' शब्दवद् भवन्ति स्त्रीलिङ्गे, पुंल्लिङ्गे च

१. फल् + सु > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप क्तं हल् ()' इति सलोपे फल्।

२. फल् + औ = फलौ। एवमेव त्रयोदशसु अजादिषु प्रत्ययेषु।

३. फल् + भ्याम् > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां > 'र्वोरुपधाया दीर्घः' इत्युपधादीर्घे > फल् + भ्याम् = फल्भ्याम्। एवमेव - फल्भिः, फल्भ्यः।

४. फल् + सुप् > 'आदेशप्रत्यययोः' इति प्रत्ययसकारस्य मूर्धन्यादेशे > फल्षु।

प्रथमा	-	फल्	फलौ	फलः
द्वितीया	-	फलम्	फलौ	फलः

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

बकारान्तः 'कब्' शब्दः, स्त्रीलिङ्गे, पुंल्लिङ्गे च

प्रथमा	-	कप्/कब्	कबौ	कबः
द्वितीया	-	कबम्	कबौ	कबः
त तीया	-	कबा	कब्भ्याम्	कब्भिः
चतुर्थी	-	कबे	कब्भ्याम्	कब्भ्यः
प चमी	-	कबः	कब्भ्याम्	कब्भ्यः
षष्ठी	-	कबः	कबोः	मदाम्
सप्तमी	-	कबि	कबोः	कब्सु
सम्बोधनम्	-	हे कप्/कब्	हे कबौ	हे कबः

सर्वेषां भकारान्तानां शब्दानां रूपाणि 'लभ्' शब्दवद् भवन्ति

स्त्रीलिङ्गे, पुंल्लिङ्गे च

१. लभ् + सु > अनुबन्धकार्ये लभ् + स् > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप त्तं हल् ()' इति सलोपे > लभ् वावसाने इति चर्त्वे > लप्। पक्षे 'झलां जशो न्ते' इति जश्त्वे > लब्।

२. लभ् + औ = लभौ। एवमेव सर्वेषु त्रयोदशसु अजादिषु प्रत्ययेषु ज्ञेयम्।

३. लभ् + भ्याम् > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'झलां जशो न्ते' इति जश्त्वे > लब्भ्याम्। एवं - लब्भिः। लब्भ्याम्। लब्भ्यः। लब्भ्याम्। लब्भ्यः।

४. लभ् + सुप् > अनुबन्धकार्ये > लभ् + सु 'खरि च' इति चर्त्वे > लप्सु।

भकारान्तः 'लभ्' शब्दः, स्त्रीलिङ्गे, पुंल्लिङ्गे च

प्रथमा	-	लप्/लब्	लभौ	लभः
द्वितीया	-	लभम्	लभौ	लभः
त तीया	-	लभा	लब्भ्याम्	लब्भिः
चतुर्थी	-	लभे	लब्भ्याम्	लब्भ्यः
प चमी	-	लभः	लब्भ्याम्	लब्भ्यः
षष्ठी	-	लभः	लभोः	लभाम्
सप्तमी	-	लभि	लभोः	लप्सु
सम्बोधनम्	-	हे लप्/लब्	हे लभौ	हे लभः

सर्वेषां मकारान्तानां शब्दानां रूपाणि 'प्रशाम्' शब्दवद् भवन्ति

स्त्रीलिङ्गे, पुंल्लिङ्गे च

१. प्रशाम् + सु > अनुबन्धकार्ये > प्रशाम् + स् > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप त्तं हल् ()' इति सलोपे > प्रशाम् 'मो नो धातोः' इति पदान्तमकारस्य नकारे > प्रशान्।

२. प्रशाम् + औ = प्रशामौ। एवमेव सर्वेषु त्रयोदशसु अजादिषु प्रत्ययेषु ज्ञेयम्।

३. प्रशाम् + भ्याम > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'मो नो धातोः' इति पदान्तमकारस्य नकारे प्रशान्भ्याम्। प्रशान्भिः। प्रशान्भ्याम्। प्रशान्भ्यः। प्रशान्भ्याम्। प्रशान्भ्यः।

४. प्रशाम् + सुप् > अनुबन्धकार्ये > प्रशाम् + सु 'मो नो धातोः' इति पदान्तमकारस्य नकारे > प्रशान्सु।

© jkf'V;laLd`rlaLFkku~] ewnzyh] 2012

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

प्रातिपदिकाधिकारः > लुब्भ्याम्। एवं - लुब्भिः। लुब्भ्याम्। लुब्भ्यः। लुब्भ्याम्। लुब्भ्यः।

४. लुप् + सुप् > अनुबन्धकार्ये > लुप् + सु 'खरि च' इति चर्त्वे > लुप्सु।

तकारान्तः 'अत्' शब्दः, स्त्रीलिङ्गे, पुंल्लिङ्गे च

प्रथमा	-	लुप्/लुब्	लुपौ	लुपः
द्वितीया	-	लुपम्	लुपौ	लुपः
त तीया	-	लुपा	लुब्भ्याम्	लुब्भिः
चतुर्थी	-	लुपे	लुब्भ्याम्	लुब्भ्यः
प चमी	-	लुपः	लुब्भ्याम्	लुब्भ्यः
षष्ठी	-	लुपः	लुपोः	लुपाम्
सप्तमी	-	लुपि	लुपोः	लुप्सु
सम्बोधनम्	-	हे लुप/लुब्	हे लुपौ	हे लुपः

सर्वेषां फकारान्तानां शब्दानां रूपाणि 'गुफ्' शब्दवद् भवन्ति

स्त्रीलिङ्गे, पुंल्लिङ्गे च

१. गुफ् + सु > अनुबन्धकार्ये > गुफ् + स् > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप तं हल् ()' इति सलोपे > गुफ् वावसाने इति चर्त्वे > गुप्। पक्षे 'झलां जशो न्ते' इति जश्त्वे > गुब्।

२. गुफ् + औ = गुफौ। एवमेव सर्वेषु त्रयोदशसु अजादिषु प्रत्ययेषु ज्ञेयम्।

३. गुफ् + भ्याम् > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'झलां जशो न्ते' इति जश्त्वे > गुब्भ्याम्। एवं - गुब्भिः। गुब्भ्याम्। गुब्भ्यः। गुब्भ्याम्। गुब्भ्यः।

४. गुफ् + सुप् > अनुबन्धकार्ये > गुफ् + सु 'खरि च' इति चर्त्वे = गुप्सु।

फकारान्तः 'गुफ्' शब्दः, स्त्रीलिङ्गे, पुंल्लिङ्गे च

प्रथमा	-	गुप्/गुब्	गुफौ	गुफः
द्वितीया	-	गुफम्	गुफौ	गुफः
त तीया	-	गुफा	गुब्भ्याम्	गुब्भिः
चतुर्थी	-	गुफे	गुब्भ्याम्	गुब्भ्यः
प चमी	-	गुफः	गुब्भ्याम्	गुब्भ्यः
षष्ठी	-	गुफः	गुफोः	गुफाम्
सप्तमी	-	गुफि	गुफोः	गुप्सु
सम्बोधनम्	-	हे गुप्/गुब्	हे गुफौ	हे गुफः

सर्वेषां बकारान्तानां शब्दानां रूपाणि 'कब्' शब्दवद् भवन्ति,

स्त्रीलिङ्गे, पुंल्लिङ्गे च

१. कब् + सु > अनुबन्धकार्ये कब् + स् > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप तं हल् ()' इति सलोपे > कब् वावसाने इति चर्त्वे > कप्। पक्षे 'झलां जशो न्ते' इति जश्त्वे > कब्।

२. कब् + औ = कबौ। एवमेव सर्वेषु त्रयोदशसु अजादिषु प्रत्ययेषु ज्ञेयम्।

३. कब् + भ्याम् > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'झलां जशो न्ते' इति जश्त्वे > कब्भ्याम्। एवं - कब्भिः। कब्भ्याम्। कब्भ्यः। कब्भ्याम्। कब्भ्यः।

४. कब् + सुप् > अनुबन्धकार्ये > कब् + सु 'खरि च' इति चर्त्वे > कप्सु।

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

२. मद् + औ = मदौ। एवमेव सर्वेषु त्रयोदशसु अजादिषु प्रत्ययेषु ज्ञेयम्।

३. मद् + भ्याम् > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'झलां जशो न्ते' इति जश्त्वे > मद्भ्याम्। एवं - मद्भिः। मद्भ्याम्। मद्भ्यः। मद्भ्याम्। मद्भ्यः।

४. मद + सुप् > अनुबन्धकार्ये > मद् + सु 'खरि च' इति चर्त्वे = मत्सु।

दकारान्तः 'मत्' शब्दः, स्त्रीलिङ्गे, पुंल्लिङ्गे च

प्रथमा	-	मत्/मद्	मदौ	मदः
द्वितीया	-	मदम्	मदौ	मदः
त तीया	-	मदा	मद्भ्याम्	मद्भिः
चतुर्थी	-	मदे	मद्भ्याम्	मद्भ्यः
प चमी	-	मदः	मद्भ्याम्	मद्भ्यः
षष्ठी	-	मदः	मदोः	मदाम्
सप्तमी	-	मदि	मदोः	मत्सु
सम्बोधनम्	-	हे मत्/मद्	हे मदौ	हे मदः

सर्वेषां धकारान्तानां शब्दानां रूपाणि 'शुध्' शब्दवद् भवन्ति
स्त्रीलिङ्गे, पुंल्लिङ्गे च

१. शुध् + सु > अनुबन्धकार्ये शुध् + स् > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप त्तं हल् ()' इति सलोपे > शुध् वावसाने इति चर्त्वे > शुत्। पक्षे 'झलां जशो न्ते' इति जश्त्वे > शुद्।

२. शुध् + औ = शुधौ। एवमेव सर्वेषु त्रयोदशसु अजादिषु प्रत्ययेषु ज्ञेयम्।

३. शुध् + भ्याम् > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'झलां जशो न्ते' इति जश्त्वे > मद्भ्याम्। एवं - शुद्भिः। शुद्भ्याम्। शुद्भ्यः। शुद्भ्याम्। शुद्भ्यः।

४. शुध् + सुप् > अनुबन्धकार्ये > शुध् + सु> 'खरि च' इति चर्त्वे = शुत्सु।

धकारान्तः 'शुध्' शब्दः, स्त्रीलिङ्गे, पुंल्लिङ्गे च

प्रथमा	-	शुत्/शुद्	शुधौ	शुधः
द्वितीया	-	शुधम्	शुधौ	शुधः
त तीया	-	शुधा	शुद्भ्याम्	शुद्भिः
चतुर्थी	-	शुधे	शुद्भ्याम्	शुद्भ्यः
प चमी	-	शुधः	शुद्भ्याम्	शुद्भ्यः
षष्ठी	-	शुधः	शुधोः	शुधाम्
सप्तमी	-	शुधि	शुधोः	शुत्सु
सम्बोधनम्	-	हे शुत्/शुद्	हे शुधौ	हे शुधः

सर्वेषां पकारान्तानां शब्दानां रूपाणि 'लुप्' शब्दवद् भवन्ति
स्त्रीलिङ्गे, पुंल्लिङ्गे च

१. लुप् + सु > अनुबन्धकार्ये लुप् + स् > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप त्तं हल् ()' इति सलोपे > लुप् वावसाने इति चर्त्वे > लुप्। पक्षे 'झलां जशो न्ते' इति जश्त्वे > लुप्।

२. लुप् + औ = लुपौ। एवमेव सर्वेषु त्रयोदशसु अजादिषु प्रत्ययेषु ज्ञेयम्।

३. लुप् + भ्याम् > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'झलां जशो न्ते' इति जश्त्वे

© jkf"V;laLd`rlaLFkku] ewnzyh] 2012

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

चतुर्थी	-	कडे	कड्भ्याम्	कड्भ्यः
प चमी	-	कडः	कड्भ्याम्	कड्भ्यः
षष्ठी	-	कडः	कडोः	कडाम्
सप्तमी	-	कडि	कडोः	कट्सु
सम्बोधनम्	-	हे कट्/कड्	हे कडौ	हे कडः

सर्वेषां णकारान्तानां शब्दानां रूपाणि 'ध्वण्' शब्दवद् भवन्ति

स्त्रीलिङ्गे, पुंल्लिङ्गे च

प्रथमा	-	ध्वण्/ध्वण्	ध्वणौ	ध्वणः
द्वितीया	-	ध्वणम्	ध्वणौ	ध्वणः
त तीया	-	ध्वणा	ध्वण्भ्याम्	ध्वण्भिः
चतुर्थी	-	ध्वणे	ध्वण्भ्याम्	ध्वण्भ्यः
प चमी	-	ध्वणः	ध्वण्भ्याम्	ध्वण्भ्यः
षष्ठी	-	ध्वणः	ध्वणोः	ध्वणाम्
सप्तमी	-	ध्वणि	ध्वणोः	ध्वण्सु
सम्बोधनम्	-	हे ध्वण्/ध्वण्	हे ध्वणौ	हे ध्वणः

सर्वेषां थकारान्तानां शब्दानां रूपाणि 'मथ्' शब्दवद् भवन्ति

स्त्रीलिङ्गे, पुंल्लिङ्गे च

१. मथ् + सु > अनुबन्धकार्ये मथ् + स् > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप क्तं हल् ()' इति सलोपे > मथ् वावसाने इति चर्त्वे > मत्। पक्षे 'झलां जशो न्ते' इति जश्त्वे > मद्।

२. मथ् + औ = मथौ। एवमेव सर्वेषु त्रयोदशसु अजादिषु प्रत्ययेषु ज्ञेयम्।

३. मथ् + भ्याम् > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'झलां जशो न्ते' इति जश्त्वे > मद्भ्याम्। एवं - मद्भिः। मद्भ्याम्। मद्भ्यः। मद्भ्याम्। मद्भ्यः।

४. मथ् + सुप् > अनुबन्धकार्ये > मथ + सु 'खरि च' इति चर्त्वे = मत्सु।

थकारान्तः 'मथ्' शब्दः, स्त्रीलिङ्गे, पुंल्लिङ्गे च

प्रथमा	-	मत्/मद्	मथौ	मथः
द्वितीया	-	मथम्	मथौ	मथः
त तीया	-	मथा	मद्भ्याम्	मद्भिः
चतुर्थी	-	मथे	मद्भ्याम्	मद्भ्यः
प चमी	-	मथः	मद्भ्याम्	मद्भ्यः
षष्ठी	-	मथः	मथोः	मथाम्
सप्तमी	-	मथि	मथोः	मत्सु
सम्बोधनम्	-	हे मत्/मद्	हे मथौ	हे मथः

दकारान्तान् सर्वनामशब्दान् वर्जयित्वा सर्वेषां दकारान्तानां शब्दानां रूपाणि 'मद्' शब्दवद् भवन्ति, स्त्रीलिङ्गे, पुंल्लिङ्गे च

१. मद् + सु > अनुबन्धकार्ये मद् + स् > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप क्तं हल् ()' इति सलोपे > सरित् वावसाने इति चर्त्वे > मद्। पक्षे 'झलां जशो न्ते' इति जश्त्वे > मद्।

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

प चमी	-	लुटः	लुड्भ्याम्	लुड्भ्यः
षष्ठी	-	लुटः	लुटोः	लुटाम्
सप्तमी	-	लुटि	लुटोः	लुट्सु
सम्बोधनम्	-	हे लुट्/लुड्	हे लुटौ	हे लुटः

सर्वेषां ठकारान्तानां शब्दानां रूपाणि 'लुठ्' शब्दवद् भवन्ति

स्त्रीलिङ्गे, पुंल्लिङ्गे च

१. लुठ् + सु > अनुबन्धकार्ये लुठ् + स् > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप त्तं हल् ()' इति सलोपे > लुठ् वावसाने इति चर्त्वे > लुट्। पक्षे 'झलां जशो न्ते' इति जश्त्वे > लुड्।

२. लुठ् + औ = लुठौ। एवमेव सर्वेषु त्रयोदशसु अजादिषु प्रत्ययेषु ज्ञेयम्।

३. लुठ् + भ्याम् > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'झलां जशो न्ते' इति जश्त्वे > लुड्भ्याम्। एवं - लुड्भिः। लुड्भ्याम्। लुड्भ्यः। लुड्भ्याम्। लुड्भ्यः।

४. लुठ् + सुप् > अनुबन्धकार्ये > लुठ् + सु 'खरि च' इति चर्त्वे = लुट्सु। अत्र 'न पदान्ताट्टोरनाम् इति ष्टुत्वं न भवति।

ठकारान्तः 'लुठ्' शब्दः, स्त्रीलिङ्गे, पुंल्लिङ्गे च

प्रथमा	-	लुट्/लुड्	लुठौ	लुठः
द्वितीया	-	लुठम्	लुठौ	लुठः
त तीया	-	लुठा	लुड्भ्याम्	लुड्भिः
चतुर्थी	-	लुठे	लुड्भ्याम्	लुड्भ्यः
प चमी	-	लुठः	लुड्भ्याम्	लुड्भ्यः
षष्ठी	-	लुठः	लुठोः	लुठाम्
सप्तमी	-	लुठि	लुठोः	लुट्सु
सम्बोधनम्	-	हे लुट्/लुड्	हे लुठौ	हे लुठः

सर्वेषां डकारान्तानां शब्दानां रूपाणि 'कड्' शब्दवद् भवन्ति

स्त्रीलिङ्गे, पुंल्लिङ्गे च

१. कड् + सु > अनुबन्धकार्ये कड् + स् > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप त्तं हल् ()' इति सलोपे > कड् वावसाने इति चर्त्वे > कट्। पक्षे 'झलां जशो न्ते' इति जश्त्वे > कड्।

२. कड् + औ = कडौ। एवमेव सर्वेषु त्रयोदशसु अजादिषु प्रत्ययेषु ज्ञेयम्।

३. कड् + भ्याम् > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'झलां जशो न्ते' इति जश्त्वे > कड्भ्याम्। एवं - कड्भिः। कड्भ्याम्। कड्भ्यः। कड्भ्याम्। कड्भ्यः।

४. कड् + सुप् > अनुबन्धकार्ये > कड् + सु 'खरि च' इति चर्त्वे > कट्सु। अत्र 'न पदान्ताट्टोरनाम् इति ष्टुत्वं न भवति।

डकारान्तः 'कड्' शब्दः, स्त्रीलिङ्गे, पुंल्लिङ्गे च

प्रथमा	-	कट्/कड्	कडौ	कडः
द्वितीया	-	कडम्	कडौ	कडः
त तीया	-	कडा	कड्भ्याम्	कड्भिः

© jkf'V;laLd`rlaLFkku] lkaxyh] 2012

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

सर्वेषां झकारान्तानां शब्दानां रूपाणि 'झर्झ्' शब्दवद् भवन्ति

स्त्रीलिङ्गे, पुंल्लिङ्गे च

१. झर्झ् + सु > अनुबन्धकार्ये झर्झ् + स् > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप तं हल् ()' इति सलोपे > झर्झ् > 'चोः कुः' इति झकारस्य कुत्वे > झर्घ्। वावसाने इति चर्त्वे > झर्क्, पक्षे 'झलां जशो न्ते' इति जश्त्वे > झर्ग्।

२. झर्झ् + औ = झर्झौ। एवमेव सर्वेषु त्रयोदशसु अजादिषु प्रत्ययेषु ज्ञेयम्।

३. झर्झ् + भ्याम् > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'चोः कुः' इति जकारस्य कुत्वे > झर्ग् + भ्याम् > 'झलां जशो न्ते' इति जश्त्वे > झग्भ्याम्। एवं भादिषु - झर्भिः। झग्भ्याम्। झर्भ्यः। झग्भ्याम्। झर्भ्यः।

४. झर्झ् + सुप् > अनुबन्धकार्ये > झर्झ् + सु > 'चोः कुः' इति झकारस्य कुत्वे > झर्घ् + सु > 'खरि च' इति चर्त्वे > झर्क् + सु > आदेशप्रत्यययोः' इति प्रत्ययसकारस्य मूर्धन्यादेशे झर्क् + षु > क्ष्संयोगेन क्षकारे > झर्क्षु।

झकारान्तः 'झर्झ्' शब्दः, स्त्रीलिङ्गे, पुंल्लिङ्गे च

प्रथमा	-	झर्क्/झर्ग्	झर्झौ	झर्झः
द्वितीया	-	झर्झम्	झर्झौ	झझः
त तीया	-	झर्झा	झग्भ्याम्	झर्भिः
चतुर्थी	-	झर्झे	झग्भ्याम्	झर्भ्यः
प चमी	-	झर्झः	झग्भ्याम्	झर्भ्यः
षष्ठी	-	झर्झः	झर्झोः	झर्झाम्
सप्तमी	-	झर्झि	झर्झोः	झर्क्षु
सम्बोधनम्	-	हे झर्क्/झर्ग्	हे झर्झौ	हे झर्झः

सर्वेषां टकारान्तानां शब्दानां रूपाणि 'लुट्' शब्दवद् भवन्ति

स्त्रीलिङ्गे, पुंल्लिङ्गे च

१. लुट् + सु > अनुबन्धकार्ये लुट् + स् > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप त्तं हल् ()' इति सलोपे > लुट् वावसाने इति चर्त्वे > लुट्। पक्षे 'झलां जशो न्ते' इति जश्त्वे > लुड्।

२. लुट् + औ = लुटौ। एवमेव सर्वेषु त्रयोदशसु अजादिषु प्रत्ययेषु ज्ञेयम्।

३. लुट् + भ्याम् > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'झलां जशो न्ते' इति जश्त्वे > लुड्भ्याम्। एवं - लुड्भिः। लुड्भ्याम्। लुड्भ्यः। लुड्भ्याम्। लुड्भ्यः।

४. लुट् + सुप् > अनुबन्धकार्ये > लुट् + सु = लुट्सु।

अत्र 'ष्टुना ष्टु' इति प्राप्तं ष्टुत्वं 'न पदान्ताट्टोरनाम् इति निषिध्यते।

टकारान्तः 'लुट्' शब्दः, स्त्रीलिङ्गे, पुंल्लिङ्गे च

प्रथमा	-	लुट्/लुड्	लुटौ	लुटः
द्वितीया	-	लुटम्	लुटौ	लुटः
त तीया	-	लुटा	लुड्भ्याम्	लुड्भिः
चतुर्थी	-	लुटे	लुड्भ्याम्	लुड्भ्यः

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

त तीया	-	स जा	स ड्भ्याम्	स ड्भिः
चतुर्थी	-	स जे	स ड्भ्याम्	स ड्भ्यः
प चमी	-	स जः	स ड्भ्याम्	स ड्भ्यः
षष्ठी	-	स जः	स जोः	स जाम्
सप्तमी	-	स जि	स जोः	स ट्त्सु/स ट्सु
सम्बोधनम्	-	हे स ट्/स ड्	हे स जौ	हे स जः

एवमेव विशेषजकारान्ताः 'इज्' 'राज्' 'भ्राज्' इत्येते शब्दाः

प्रथमा	-	इट्/इड्	इजौ	इजः
द्वितीया	-	इजम्	इजौ	इजः
त तीया	-	इजा	इड्भ्याम्	इड्भिः
चतुर्थी	-	इजे	इड्भ्याम्	इड्भ्यः
प चमी	-	इजः	इड्भ्याम्	इड्भ्यः
षष्ठी	-	इजः	इजोः	इजाम्
सप्तमी	-	इजि	इजोः	इट्त्सु/इट्सु
सम्बोधनम्	-	हे इट्/इड्	हे इजौ	हे इजः

शेषजकारान्तानां शब्दानां रूपाणि 'त्यज्' शब्दवद् भवन्ति

स्त्रीलिङ्गे, पुंल्लिङ्गे च

१. त्यज् + सु > अनुबन्धकार्ये > त्यज् + स् > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप क्तं हल् ()' इति सलोपे > त्यज् 'चोः कुः' इति जकारस्य कुत्वे > त्यग्। वावसाने इति चर्त्वे > त्यक्। पक्षे - 'झलां जशो न्ते' इति जश्त्वे > त्यग्।

२. त्यज् + औ = त्यजौ। एवमेव सर्वेषु त्रयोदशसु अजादिषु प्रत्ययेषु ज्ञेयम्।

३. त्यज् + भ्याम् > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'चोः कुः' इति जकारस्य कुत्वे > त्यग् + भ्याम् > 'झलां जशो न्ते' इति जश्त्वे > त्यग्भ्याम्। एवं - त्यग्भिः। त्यग्भ्याम्। त्यग्भ्यः। त्यग्भ्याम्। त्यग्भ्यः।

४. त्यज् + सुप् > अनुबन्धकार्ये > त्यज् + सु > 'चोः कुः' इति जकारस्य कुत्वे > त्यक् + सु > 'आदेशप्रत्यययोः' इति प्रत्ययसकारस्य मूर्धन्यादेशे > त्यक् + षु > क्ष्संयोगेन क्षकारे > त्यक्षु।

शेषजकारान्तशब्दाः

प्रथमा	-	त्यक्/त्यग्	त्यजौ	त्यजः
द्वितीया	-	त्यजम्	त्यजौ	त्यजः
त तीया	-	त्यजा	त्यग्भ्याम्	त्यग्भिः
चतुर्थी	-	त्यजे	त्यग्भ्याम्	त्यग्भ्यः
प चमी	-	त्यजः	त्यग्भ्याम्	त्यग्भ्यः
षष्ठी	-	त्यजः	त्यजोः	त्यजाम्
सप्तमी	-	त्यजि	त्यजोः	त्यक्षु
सम्बोधनम्	-	हे त्यक्/त्यग्	हे त्यजौ	हे त्यजः

© jkf"V;laLd`rlaLFkku] ubZnsgyh] 2012

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

इति जश्त्वे > भ ज्जौ। एवमेव सर्वेषु त्रयोदशसु अजादिषु प्रत्ययेषु ज्ञेयम्।

३. भ स्ज् + भ्याम् > 'स्को: संयोगाद्योरन्ते च' इति संयोगादिसकारस्य लोपे > भ ज् + भ्याम् >'व्रश्चभ्रस्जस जम जयजराजभ्राजच्छशां ष:' इति जकारस्य षकारे > भ ष् + भ्याम् > 'झलां जशो न्ते' इति जश्त्वे > भ ड्भ्याम्। एवमेव सर्वेषु षट्सु भकारादिषु प्रत्ययेषु ज्ञेयम्।

४. भ स्ज् + सुप् >'स्को: संयोगाद्योरन्ते च' इति संयोगादिसकारस्य लोपे > भ ज् + सु > 'व्रश्चभ्रस्जस जम जयजराजभ्राजच्छशां ष:' इति जकारस्य षकारे > भ ष् + सु > 'झलां जशो न्ते' इति जश्त्वे > भ ड् + सु > 'ड: सि धुट्' इति वा धुडागमे > भ ड् + धुट् + सु > 'खरि च इति धकारस्य चर्त्वे > भ ड् + त् + सु > 'खरि च इति डकारस्य चर्त्वे > भ ट् + त् + सु = भ ट्त्सु। धुडभावे - भ ट्सु। अत्र 'न पदान्ताट्टोरनाम् इति ष्टुत्वं न भवति।

जकारान्तस्य 'भ स्ज्' इत्यस्य रूपाण्येवम्

प्रथमा	-	भ ट्/भ ड्	भ ज्जौ	भ ज्ज:
द्वितीया	-	भ ज्जम्	भ ज्जौ	भ ज्ज:
त तीया	-	भ ज्जा	भ ड्भ्याम्	भ ड्भि:
चतुर्थी	-	भ ज्जे	भ ड्भ्याम्	भ ड्भ्य:
प चमी	-	भ ज्ज:	भ ड्भ्याम्	भ ड्भ्य:
षष्ठी	-	भ ज्ज:	भ ज्जो:	भ ज्जाम्
सप्तमी	-	भ ज्जि	भ ज्जो:	भ ट्त्सु/भ ट्सु
सम्बोधनम्	-	हे भ ट्/भ ड्	हे भ ज्जौ	हे भ ज्ज:

विशेषजकारान्तौ 'स ज्' 'म ज्' इत्येतौ शब्दौ

१. स ज् + सु > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप क्तं हल् ()' इति सलोपे > स ज् > 'व्रश्चभ्रस्जस जम जयजराजभ्राजच्छशां ष:' इति जकारस्य षकारे > स ष् > वावसाने इति चर्त्वे > स ट्, पक्षे 'झलां जशो न्ते' इति जश्त्वे > स ड्।

२. स ज् + औ > स जौ। एवमेव सर्वेषु त्रयोदशसु अजादिषु प्रत्ययेषु ज्ञेयम्।

३. स ज् + भ्याम् > 'व्रश्चभ्रस्जस जम जयजराजभ्राजच्छशां ष:' इति जकारस्य षकारे > स ष् + भ्याम् > 'झलां जशो न्ते' इति जश्त्वे > स ड्भ्याम्। एवमेव सर्वेषु षट्सु भकारादिषु प्रत्ययेषु ज्ञेयम्।

४. स ज् + सुप् > 'व्रश्चभ्रस्जस जम जयजराजभ्राजच्छशां ष:' इति जकारस्य षकारे > स ष् + सु > 'झलां जशो न्ते' इति जश्त्वे > स ड् + सु > 'ड: सि धुट्' इति वा धुडागमे > स ड् + धुट् + सु > 'खरि च इति धकारस्य चर्त्वे > स ड् + त् + सु > 'खरि च इति डकारस्य चर्त्वे > स ट् + त् + सु = स ट्त्सु। धुडभावे - स ट्सु। अत्र 'न पदान्ताट्टोरनाम् इति ष्टुत्वं न भवति।

इत्थ च जकारान्तयो: स ज्, म ज्, इत्यनयो: रूपाण्येवम्

प्रथमा	-	स ट्/स ड्	स जौ	स ज:
द्वितीया	-	स जम्	स जौ	स ज:

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

इत्थ च चकारान्त-व श्च्-शब्दस्य रूपाण्येवम्

प्रथमा	-	व ट्/व ड्	व श्चौ	व श्चः
द्वितीया	-	व श्चम्	व श्चौ	व श्चः
त तीया	-	व श्चा	व ड्भ्याम्	व ड्भिः
चतुर्थी	-	व श्चे	व ड्भ्याम्	व ड्भ्यः
प चमी	-	व श्चः	व ड्भ्याम्	व ड्भ्यः
षष्ठी	-	व श्चः	व श्चोः	व श्चाम्
सप्तमी	-	व श्चि	व श्चोः	व ट्त्सु/व ट्सु

शेषचकारान्तानां शब्दानां रूपाणि 'म्रुच्' शब्दवद् भवन्ति

स्त्रीलिङ्गे, पुंल्लिङ्गे च

१. म्रुच् + सु > अनुबन्धकार्ये > म्रुच् + स् > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप तं हल् ()' इति सलोपे > वाच् 'चोः कुः' इति चकारस्य कुत्वे > म्रुक्। वावसाने इति चर्त्वे > म्रुक्, पक्षे 'झलां जशो न्ते' इति जश्त्वे > म्रुग्।

२. म्रुच् + औ = म्रुचौ। एवमेव सर्वेषु त्रयोदशसु अजादिषु प्रत्ययेषु ज्ञेयम्।

३. म्रुच् + भ्याम् > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'चोः कुः' इति चकारस्य कुत्वे > म्रुक् + भ्याम् > 'झलां जशो न्ते' इति जश्त्वे > म्रुग्भ्याम्।

एवं - म्रुग्भिः। म्रुग्भ्याम्। म्रुग्भ्यः। म्रुग्भ्याम्। म्रुग्भ्यः।

४. म्रुच् + सुप् > अनुबन्धकार्ये > म्रुच् + सु > 'चोः कुः' इति चकारस्य कुत्वे > म्रुक् + सु > 'आदेशप्रत्यययोः' इति प्रत्ययसकारस्य मूर्धन्यादेशे > म्रुक् + षु > क्ष्संयोगेन क्षकारे > म्रुक्षु।

प्रथमा	-	म्रुक्/म्रुग्	म्रुचौ	म्रुचः
द्वितीया	-	म्रुचम्	म्रुचौ	म्रुचः
त तीया	-	म्रुचा	म्रुग्भ्याम्	म्रुग्भिः
चतुर्थी	-	म्रुचे	म्रुग्भ्याम्	म्रुग्भ्यः
प चमी	-	म्रुचः	म्रुग्भ्याम्	म्रुग्भ्यः
षष्ठी	-	म्रुचः	म्रुचोः	म्रुचाम्
सप्तमी	-	म्रुचि	म्रुचोः	म्रुक्षु
सम्बोधनम्	-	हे म्रुक्/म्रुग्	हे म्रुचौ	हे म्रुचः

जकारान्ताः

विशेषजकारान्तः 'भ स्ज्' शब्दः

१. भ स्ज् + सु > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप तं हल् ()' इति सलोपे > भ स्ज् > 'स्कोः संयोगाद्योरन्ते च' इति संयोगादिसकारस्य लोपे> भ ज् 'व्रश्चभ्रस्जस जम जयजराजभ्राजच्छशां षः' इति जकारस्य षकारे > भ ष् > वावसाने इति चर्त्वे > भ ट्, पक्षे 'झलां जशो न्ते' इति जश्त्वे > भ ड्।

२. भ स्ज् + औ > 'स्तोः श्चुना श्चुः' इति श्चुत्वे भ श्ज् + औ > 'झलां जश् झशि

© jkf'V;laLd`rlaLFkku] ewnqyh] 2012

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

सर्वेषां गकारान्तानां शब्दानां रूपाणि 'रग्' शब्दवद् भवन्ति

स्त्रीलिङ्गे, पुंल्लिङ्गे च

प्रथमा	-	रक्/रग्	रगौ	रगः
द्वितीया	-	रगम्	रगौ	रगः
त तीया	-	रगा	रग्भ्याम्	रग्भिः
चतुर्थी	-	रगे	रग्भ्याम्	रग्भ्यः
प चमी	-	रगः	रग्भ्याम्	रग्भ्यः
षष्ठी	-	रगः	रगोः	रगाम्
सप्तमी	-	रगि	रगोः	रक्षु

सर्वेषां घकारान्तानां शब्दानां रूपाणि 'घघ्' शब्दवद् भवन्ति

स्त्रीलिङ्गे, पुंल्लिङ्गे च

प्रथमा	-	घक्/घग्	घघौ	घघः
द्वितीया	-	घघम्	घघौ	घघः
त तीया	-	घघा	घग्भ्याम्	घग्भिः
चतुर्थी	-	घघे	घग्भ्याम्	घग्भ्यः
प चमी	-	घघः	घग्भ्याम्	घग्भ्यः
षष्ठी	-	घघः	घघोः	घघाम्
सप्तमी	-	घघि	घघोः	घक्षु

चकारान्ताः

विशेषचकारान्तः 'व श्च्' शब्दः

१. व श्च् + सु > 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप त्तं हल् ()' इति सलोपे, 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां > व श्च् > 'स्कोः संयोगाद्योरन्ते च' इति संयोगादि-सकारस्य लोपे > व च् 'व्रश्चभ्रस्जस जम जयजराजभ्राजच्छशां षः' इति चकारस्य षकारे > व ष् > वावसाने इति चर्त्वे > व ट्, पक्षे 'झलां जशो न्ते' इति जश्त्वे > व ड्।

२. औ - व श्चौ। जस् - व श्चः। अम् - व श्चम्। औ - व श्चः। आ - व श्चा। अः - व श्चः। ओः - व श्चः। आम् - व श्चाम्। एवमेव सर्वेषु अजादिषु प्रत्ययेषु ज्ञेयम्।

३. व श्च् + भ्याम् > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'स्कोः संयोगाद्योरन्ते च' इति संयोगादिसकारस्य लोपे > व च् + भ्याम् > 'व्रश्चभ्रस्जस जम जयजराजभ्राजच्छशां षः' इति चकारस्य षकारे > व ष् + भ्याम् > 'झलां जशो न्ते' इति जश्त्वे > व ड्भ्याम्। एवमेव सर्वेषु भकारादिषु प्रत्ययेषु ज्ञेयम्।

४. व श्च् + सुप् > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'स्कोः संयोगाद्योरन्ते च' इति संयोगादिसकारस्य लोपे > व च् + सु > 'व्रश्चभ्रस्जस जम जयजराजभ्राजच्छशां षः' इति चकारस्य षकारे > व ष् + सु > 'झलां जशो न्ते' इति जश्त्वे > व ड् + सु > 'डः सि धुट्' इति वा धुडागमे > व ड् + धुट् + सु > 'खरि च इति धकारस्य चर्त्वे > व ड् + त् + सु > 'खरि च इति डकारस्य चर्त्वे > व ट् + त् + सु > व ट्त्सु। धुडभावे > व ट्सु।

अत्र 'न पदान्ताट्टोरनाम् इति ष्टुत्वं न भवति।

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

तक्	+	अः	=	तकः
तक्	+	अम्	=	तकम्
तक्	+	औ	=	तकौ
तक्	+	अः	=	तकः
तक्	+	आ	=	तका
तक्	+	ए	=	तके
तक्	+	अः	=	तकः
तक्	+	अः	=	तकः
तक्	+	ओः	=	तकोः
तक्	+	आम्	=	तकाम्
तक्	+	इ	=	तकि
तक्	+	ओः	=	तकोः

३. भकारादयः प्रत्ययाः षट् - भ्याम् भिः भ्याम् भ्यः भ्याम् भ्यः। एषां रूपाणि समानानि भवन्ति। अतः सर्वत्र एकस्य साधनेन षट् सिध्यन्ति। यथा -

तक् + भ्याम् > 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां > तक् + भ्याम् > 'झलां जशो न्ते' इति जश्त्वे > तग्भ्याम्। एवं - तग्भिः। तग्भ्याम्। तग्भ्यः। तग्भ्याम्। तग्भ्यः।

४. सप्तमीबहुवचनस्य 'सुप्' प्रत्ययः

तक् + सुप् > अनुबन्धकार्ये > तक् + सु > 'आदेशप्रत्यययोः' इति प्रत्ययसकारस्य मूर्धन्यादेशे > तक् + षु > क्ष्संयोगेन क्षकारे > तक्षु।

ककारान्तः 'तक्' शब्दः, स्त्रीलिङ्गे, पुंल्लिङ्गे च

प्रथमा	-	तक् / तग्	तकौ	तकः
द्वितीया	-	तकम्	तकौ	तकः
त तीया	-	तका	तग्भ्याम्	तग्भिः
चतुर्थी	-	तके	तग्भ्याम्	तग्भ्यः
प चमी	-	तकः	तग्भ्याम्	तग्भ्यः
षष्ठी	-	तकः	तकोः	तकाम्
सप्तमी	-	तकि	तकोः	तक्षु

अनयैव रीत्या सर्वे खकारान्ता, गकारान्ता, घकारान्ता अपि शब्दा निष्पादनीयाः।

सर्वेषां खकारान्तानां शब्दानां रूपाणि 'लिख्' शब्दवद् भवन्ति

स्त्रीलिङ्गे, पुंल्लिङ्गे च

प्रथमा	-	लिक् / लिग्	लिखौ	लिखः
द्वितीया	-	लिखम्	लिखौ	लिखः
त तीया	-	लिखा	लिग्भ्याम्	लिग्भिः
चतुर्थी	-	लिखे	लिग्भ्याम्	लिग्भ्यः
प चमी	-	लिखः	लिग्भ्याम्	लिग्भ्यः
षष्ठी	-	लिखः	लिखोः	लिखाम्
सप्तमी	-	लिखि	लिखोः	लिक्षु

© jkf"V;laLd`rlaLFkku] lUnsgh] 2012

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

परिशिष्टम्

सन्धिमात्रेण निष्पन्ना सुबन्ताः

सन्धिर्भवद्भिरधीतः। सुप्प्रत्ययेषु परतो यदा किमप्यङ्गकार्यं नोच्यते, तदा सन्धिरेव कार्यं भवति। इदानीं वयं अनेकेषां हलन्तप्रातिपदिकानां रूपाणिं सन्धिं क त्वा निष्पादयामः।

सुप्-विभक्तयः

	एकवचनम्	द्विवचनम्	बहुवचनम्		एक.	द्वि.	बहु.
प्रथमा	- सु	औ	जस्	-	स्	*औ*	*अः*
द्वितीया	- अम्	औट्	शस्	-	*अम्*	*औ*	*अः*
त तीया	- टा	भ्याम्	भिस्	-	*आ*	भ्याम्	भिः
चतुर्थी	- ङे	भ्याम्	भ्यस्	-	*ए*	भ्याम्	भ्यः
प चमी	- ङसि	भ्याम्	भ्यस्	-	*अः*	भ्याम्	भ्यः
षष्ठी	- ङस्	ओस्	आम्	-	*अः*	*ओः*	*आम्*
सप्तमी	- ङि	ओस्	सुप्	-	*इ*	*ओः*	सु

यदा हलन्तेभ्यः प्रातिपदिकेभ्यो इमे सुप्प्रत्यया विधीयन्ते, तदा सन्धिकार्यार्थमेषां प्रत्ययानां चत्वारो विभागा विधेयाः। चतुर्षु वर्गेषु एकैकमेव रूपं निष्पादनीयम्।

१. प्रथमैकवचनस्य 'सु' प्रत्ययः।

२. अजादिप्रत्ययाः त्रयोदश - औ अः अम् औ अः आ ए अः अः ओः आम् इ ओः। इमे स्थूलाक्षरैर्लिखितास्त्रयोदशप्रत्ययाः अजादयः सन्ति। एषां रूपाणि समानानि भवन्ति। अतः सर्वत्र एकस्य साधनेन त्रयोदश सिध्यन्ति।

३. भकारादयः प्रत्ययाः षट् - भ्याम् भिः भ्याम् भ्यः भ्याम् भ्यः। एषां रूपाणि समानानि भवन्ति। अतः सर्वत्र एकस्य साधनेन षट् सिध्यन्ति।

४. सप्तमीबहुवचनस्य 'सुप्' प्रत्ययः।

अनेनैव क्रमेण वयं ककारान्तादारभ्य प्रातिपदिकानां सुबन्तरूपाणि साधयामः ---

सर्वेषां ककारान्तानां शब्दानां रूपाणि 'तक्' शब्दवद् भवन्ति

स्त्रीलिङ्गे, पुंल्लिङ्गे च

१. प्रथमैकवचनस्य 'सु' प्रत्ययः।

तक् + सु - अनुबन्धकार्ये > तक् + स् 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यप त्तं हल् ()' इति सलोपे > तक्। वावसाने इति चर्त्वे > तक्, पक्षे 'झलां जशो न्ते' इति जश्त्वे > तग्।

२. अजादिप्रत्ययाः त्रयोदश - औ अः अम् औ अः आ ए अः अः ओः आम् इ ओः।
इमे स्थूलाक्षरैर्लिखितास्त्रयोदशप्रत्ययाः अजादयः सन्ति। एषां रूपाणि समानानि भवन्ति। अतः सर्वत्र एकस्य साधनेन त्रयोदश सिध्यन्ति।

प्रातिपदिकं हलन्तं चेद्, एषु अजादिषु प्रत्ययेषु परतः, वर्णसंयोग एव भवति। यथा -

तक् + औ = तकौ

तक् + अः = तकः

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.